A.C. Joshi Library
P.U. Chandigarh

MSS No. 154 Subject Religion

Name of MSS भागवत महात्मय Bhagvata Māhātmya

Author

Period Folios 24 (001 to 022 + 024, 025)

Script Sanskrit Source Prithipal Singh

Missing Folios 023

यंच॥सर्वसिद्धांतनिष्पन्नंसंसारभयनाशनं॥८॥भक्त्योघवर्द्धनंयच्चकृष्णसंतोषहेतुकं
तदहंतेभिधास्यामिसावधानतयाशृणु॥९॥कालव्यालमुखग्रासत्रासनिर्णाशहेतवे॥श्री
मद्भागवतंशास्त्रंकलौकीरेणभाषितं॥१०॥एतस्मादपरंकिंचिन्मनःशुद्ध्यैनविद्यते
जन्मांतरेभवेत्पुण्यंतदाभागवतंलभेत्॥११॥परीक्षितेकथांवक्तुंसभायांसंस्थितेशुके
सुधाकुंभंगृहीत्वैवदेवास्तत्रसमागमन्॥१२॥शुकंनत्वावदन्सर्वेस्वकार्यकुशलाःसुराः
कथासुधांप्रयच्छस्वगृहीत्वैवसुधामिमां॥१३॥एवंविनिमयेजातेसुधाराज्ञाप्रपीयतां
प्रपास्यामोवयंसर्वेश्रीमद्भागवतामृतं॥१४॥क्वसुधाक्वकथालोकेक्वकाचःक्वम
णिर्महान्॥ब्रह्मरातोविचार्यैवंतदादेवाञ्जहासह॥१५॥अभक्तांस्तांश्चविज्ञायनददौ
सकथामृतं॥श्रीमद्भागवतीवार्तासुराणामपिदुर्लभा॥१६॥राज्ञोमोक्षंतथावीक्ष्यपुरा
धातापिविस्मितः॥सत्यलोकेतुलांबद्ध्वातोलयत्साधनान्यजः॥१७॥लघून्यन्यानिजाता

मा॰ भा॰
२

तानिगौरवेणाद्यंमहत् ॥ तदाऋषिगणाःसर्वेविस्मयंपरमंययुः ॥१८॥ मेनिरेभगवद्रू
पंशास्त्रंभागवतंकलौ ॥ पठनाच्छ्रवणात्सद्योवैकुंठफलदायके ॥१९॥ सप्ताहेनश्रु
तंचैतत्सर्वथामुक्तिदायकं ॥ सनकाद्यैःपुराप्रोक्तंनारदायदयापरैः ॥२०॥ यद्यपिब्र
ह्मसंबंधाच्छ्रुतमेतत्सुरर्षिणा ॥ सप्ताहश्रवणविधिःकुमारैस्तस्यभाषितः ॥२१॥
श्रीशौनकउवाच ॥ लोकविग्रहमुक्तस्यनारदस्यास्थिरस्यच ॥ विधिश्रवेकुतःप्रीतिः
संयोगःकुत्रतैःसह ॥२२॥ श्रीसूतउवाच ॥ अत्रतेकीर्तयिष्यामिभक्तियुक्तंकथानकं ॥
शुकेनममयत्प्रोक्तंरहःशिष्यंविचार्यच ॥२३॥ एकदाहिविशालायांचत्वारऋषयो
मलाः ॥ सत्संगार्थंसमायाताःददृशुस्तत्रनारदं ॥२४॥ कुमाराऊचुः ॥ कथंब्रह्मन्दीन
मुखःकुतश्चिंतातुरोभवान् ॥ त्वरितंगम्यतेकुत्रकुतश्चागमनंतव ॥२५॥ इदानींशू
न्यचित्तोसिगतवित्तोयथाजनः ॥ तवेदंमुक्तसंगस्यनोचितंवदकारणं ॥२६॥ श्री २

नारद उवाच ॥ अहं तु पृथिवीं यातो ज्ञात्वा सर्वोत्तमामिति ॥ पुष्करं च प्रयागं च काशीं गो
दावरीं तथा ॥ २७ ॥ हरिक्षेत्रं कुरुक्षेत्रं श्रीरंगं सेतुबंधनं ॥ सत्यं नास्ति तपः शौचं दया दानं न
विद्यते ॥ २८ ॥ उदरंभरिणो जीवा वराकाः कूटभाषिणः ॥ मंदाः सुमंदमतयो मंदभाग्या
ह्युपद्रुताः ॥ २९ ॥ पाखंडनिरताः संतो विरक्ताः सपरिग्रहाः ॥ तरुणी प्रभुता गेहे श्यालको
बुद्धिदायकः ॥ ३० ॥ कन्याविक्रयिणो लोभाद्दंपतीनां च कल्कनं ॥ आश्रमा यवनै रुद्धा
स्तीर्थानि सरितस्तथा ॥ ३१ ॥ देवतायतनान्यत्र दुष्टैर्नष्टानि भूरिशः ॥ न योगी नैव सिद्धो वा
न ज्ञानी सत्क्रियो नरः ॥ ३२ ॥ कलिदावानलेनाद्य साधनं भस्मतां गतं ॥ अट्टशूला जनप
दाः शिवशूला द्विजातयः ॥ ३३ ॥ कामिन्यः केशशूलिन्यः संभवंति कलाविह ॥ एवं
पश्यन्कलेर्दोषान्पर्यटन्नवनीमहं ॥ यामुनं तटमापन्नो यत्र लीला हरेरभूत् ॥ तत्राश्चर्यं म
या दृष्टं श्रूयतां तन्मुनीश्वराः ॥ एका तु तरुणी तत्र निषण्णा खिन्नमानसा ॥ ३६ ॥ द्वौ वृद्धौ

मा. भा.
३

पतितौ पार्श्वे निःश्वसंताव चेतनौ ॥ शुद्धं वीजयंती संबोधयंती सा करोति रुदनं पुरः ॥ ४६ ॥ दशदित्त
निरीक्षंती रक्षितारं निजं पुनः ॥ वीज्यमाना शतस्त्रीभिर्बोध्यमाना मुहुर्मुहुः ॥ ४७ ॥ दृष्ट्वा दूरा
द्गतः सोहं कौतुकेन तदंतिके ॥ मां दृष्ट्वा चोत्थिता बाला विह्वला चाब्रवीद्वचः ॥ ४८ ॥ बालोवाच
भो भोः साधो क्षणं तिष्ठ मच्चिंतामपि नाशय ॥ दर्शनं तव लोकस्य सर्वथाघहरं परं ॥ ४९ ॥ बहुधा
तव वाक्येन दुःखशांतिर्भविष्यति ॥ यदा भाग्यं भवेद्भूरि भवतो दर्शनं तदा ॥ ५० ॥ श्रीनारदउवा
च ॥ का त्वं कौ चेमौ नार्यः का एताः पद्मलोचनाः ॥ वद देवि सविस्तारं स्वस्य दुःखस्य का
रणं ॥ ५१ ॥ बालोवाच ॥ अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ ॥ ज्ञानवैराग्यनामानौ का
लयोगेन जर्जरौ ॥ ५२ ॥ गंगाद्याः सरित इमाः मत्सेवार्थं समागताः ॥ तथापि च न मे श्रेयः से
वितायाः सुरैरपि ॥ ५३ ॥ इदानीं शृणु मद्वार्त्तां सचित्तस्त्वं तपोधन ॥ वार्त्ता मे वितताप्यस्ति तां ३
श्रुत्वा सुखमावह ॥ ५४ ॥ उत्पन्ना द्राविडे साहं वृद्धिं कर्णाटके गता ॥ क्वचित्क्वचिन्महाराष्ट्रे

गुल्मैर्जीर्णतांगता ।४५। तमन्नचोरकलेर्दोषात्यात्वेदैः खिन्नांगका ॥ इर्वलाहंविरजाता
पुत्राभ्यांसहसंदत्ता ।४६। वृंदावनेपुनःप्राप्य नवीनैनवसन्नद्दपिणी ॥ नानाहंपुष्पवतीसम्यक्
प्रेमरूपातत्सा प्रपन्ने ॥४७॥ इमौतौशपितावयमत्तौमेक्रिश्यतःप्रमाद ॥ इदंस्थानंपरित्यज्य
विदेशंगमिष्यतेमया ॥ जरठत्वेसमायातौतौनेनरःखिन्नौसुखिता ।४८॥ साहंततःकथंकस्मात्
तौहृद्याविमोक्तुतः ॥ अद्यपश्यामिसद्रूसारिन्ताहृदिपरीतंज्ञनःस्थितं ॥४९॥ यदत्रैवरदीमातात
तत्रैतन्नयथावि ॥ श्रीनारदउवाच ॥ तातेनात्मनियद्दृष्ट्वामिसर्वमेतन्नवानवे ॥ नविषादस्त्व
याकार्योहरिस्तेशंकरिष्यति ॥५०॥ सूतउवाच ॥ तत्त्मामावेणतत्त्वात्वावाक्यमुच्चैर्मनी
षाः ॥ स्तणाद्वावहित्वाबालेषुगोवंदारूणः कलि ॥५१॥ तेनलग्नाःसदाचाराः योगमा
र्गोस्तपांसिच ॥ जनाःप्रद्यासुरायंतेशाकडःकर्मकारिणः ॥५२॥ इहसंतोविषीदंतिमह
त्यंतियासाधवः धन्वेधेर्यंतयाधीमान्सधीरःपंडितोयथा ॥५३॥ अस्पृश्यानवलोक्यंपंशोष
भारकराधरा ॥ वर्षेवर्षेक्रमाज्ञातामंगलंनापिदृश्यते ॥५४॥ ननामपिसतैःसाकंसो

भा॰ मा॰
४

विपश्यतिसांप्रते॥ उपेक्षितानिरागांधैर्जर्जरत्वेनसंस्थिता॥५५॥वृंदावनस्यसंयोगात्पुनस्त्वंतरु
णीनवा॥धन्यंवृंदावनंतेनभक्तिर्नृत्यतियत्रच॥५६॥अत्रेमौग्राहकाभावान्नजरामपिमुंचत॥
किंचिदात्मसुखेनेवप्रसुप्तिर्मन्यतेनयोः॥५७॥भक्ति वाच॥कथंपरीक्षिताराज्ञास्थापितोह्य
शुचिःकलिः॥प्रवृत्तेतुकलौसर्वसारः॥सर्वगतोमहान्॥५८॥करुणापरेणहरिणाप्यः॥
धर्मःकथमीक्ष्यते॥इमंमेसंशयंछिंधित्वद्वाचासुखितास्म्यहं॥५९॥श्रीनारदउवाच॥यदिपृ
ष्टस्त्वयाबालेप्रेमतःश्रवणंकुरु॥सर्वंवक्ष्यामितेभद्रेकश्मलंतेगमिष्यति॥६०॥यदामुकुं
दोभगवान्क्ष्मांत्यक्त्वास्वपदंगतः॥तद्दिनात्कलिरायातःसर्वसाधनबाधकः॥६१॥दृष्टोदि
ग्विजयेराज्ञादीनवच्छरणंगतः॥यत्फलंनास्तितपसानयोगेनसमाधिना॥६२॥तत्फ
लंलभतेसम्यक्कलौकेशवकीर्तनात्॥विष्णुरातःस्थापितवान्कलिजानांसुखाय ४
हि॥६३॥कुकर्माचरणात्सारःसर्वतोनिर्गतोधुना॥पदार्थाःसंस्थिताभूमौबीजहीनाय
थातुषा॥६४॥विप्रैर्भागवतीवार्तागेहेगेहेजनेजने॥कारिताकणलोभेनकथासार

स्ततोगतः ॥४५॥ स्वल्पमप्यभूत्किकर्मयोगेननास्तिकादांभिकाश्चनराः ॥ तेहितिष्ठंतिकीर्तयेस्तुतीर्थे
सार्वस्ततोगतः ॥४६॥ कामक्रोधमहामोहत्स्साध्याकुलचेतसः ॥ तेपितिष्ठंतितत्रपसितपः
सार्वस्ततोगतः ॥४७॥ मनसस्मानयालोभाद्दंभान्याघोरसंश्रयात् ॥ शास्त्रानभ्यसनाच्चैवध्या
नयोगफलंगतं ॥४८॥ पंडितास्तुकलयेगारमंतेमहिषाश्च ॥ पुत्रोन्मादनदत्तास्तेयदता
स्तेमुक्तिसाधने ॥४९॥ नहिवैस्वमतालोकेसंभदायपुरः सरं ॥ एवंप्रलयतोधर्मोवस्तुसा
रः ॥ स्वस्थलेस्वस्थले ॥५०॥ अयंतत्रुगाधर्मोहिवर्ततेकसहूवणां ॥ अतस्तुपुंडरीकाक्षः सहिते
निकटेस्थितः ॥५१॥ सूत उवाच ॥ इतितद्वचनंश्रुत्वाविस्मयंपरमंगता ॥ भक्तिरूपेवचोभूत्
पः अथतांनत्वयौनकः ॥५२॥ स्वार्थंतत्वंतपन्नोसिमदृगपेनसमागताः ॥ साधूनांदर्शने
लोकेसर्वेसिद्धिकरंपरं ॥५३॥ इदानींदोषयामेसाक्षिप्येपापतत्वयोग्यतो ॥ योगेशास्तापिते
ब्रह्मज्ञानसाध्यंवर्ततेधुना ॥५४॥ त्वजानातिजगतिमायोवस्यकायधवसे ॥ वचनस्यवनमेकंके
वलंचालयं ॥ कवपदमपियानोयत्कृपालोयथवोधंसकलज्ञानलयाग्रंश्रवसपथंनतो॥

भा॰ मा॰
५

स्मि ॥ ७५ ॥ इतिश्रीपद्मपुराणेउत्तरखंडेभागवतमाहात्म्येभक्तिनारदसंवादोनामप्रथमोध्यायः १ श्री
नारदउवाच ॥ वृथाखेदयसेबालेअहोचिंतातुराकथं ॥ श्रीकृष्णचरणांभोजंस्मरदुःखंगमि
ष्यति ॥ १ द्रौपदीचपरित्रातायेनकौरवकश्मलात् ॥ पालितागोपसुंदर्यः ॥ सकृष्णःक्वापि
नोगतः ॥ २ त्वंतुभक्तिःप्रियातस्यसततंप्राणतोधिकात्वयाहूतस्तुहिभगवान्यातिनीच
गृहेष्वपि ॥ ३ ॥ सत्यादित्रियुगेबोधवैराग्यौमुक्तिसाधकौ ॥ कलौतुकेवलंभक्तिर्ब्रह्मसायु
ज्यकारिणी ॥ ४ ॥ इतिनिश्चित्यचिद्रूपःसद्रूपांत्वांससर्जह परमानंदचिन्मूर्तिंसुंदरींकृष्ण
वल्लभां ॥ ५ ॥ बद्धांजलिस्त्वयापृष्टःकिंकरोमीतिचैकदा ॥ त्वांतदाज्ञापयत्कृष्णोमद्भक्ता
न्पोषयेतिच ॥ ६ ॥ अंगीकृतंत्वयातद्वैप्रसन्नोभूद्धरिस्तदा ॥ मुक्तिंदासींददौतुभ्यंज्ञानवैरा
ग्यकाविमौ ॥ ७ ॥ पोषणंस्वेनरूपेणवैकुंठेत्वंकरोषिच ॥ भूमौभक्तविपोषायमत्स्वरू
पंत्वयाकृतं ॥ ८ ॥ मुक्तिंज्ञानंविरक्तिंचसहकृत्वागताभुवि ॥ कृतादिद्वापरस्यांतंमहा
नंदेनसंस्थिता ॥ ९ ॥ कलौमुक्तिःक्षयंप्राप्तापाखंडामयपीडिता ॥ त्वदाज्ञयागताशीघ्रंवै ५

ष्ठं पुनरेव सा ॥१०॥ सस्मान्य पाणि चाग्रे वभक्तिरपालिंच ॥ ग्रीकृत्य त्वयि मे मोचयाम्येवमस्य
चरन्ति मे ॥११॥ उपेक्षा नः कलौ मंदो हृदो ज्ञातो मतातव ॥ तथापि चिंतां मा मन्ये च तत्र मपायं चिं-
तये प्रमूहं ॥१२॥ कलिना सदृशः कोपि युगो नास्ति वरानने ॥ तस्मिंस्त्वां स्थापयिष्यामि गेहे
गेहे जने जने ॥१३॥ अन्यधर्मांस्तिरस्कृत्य पुरस्कृत्य महोत्सवान् ॥ तदा नाहं हरेर्दासो लो-
के त्वां न प्रवर्तये ॥१४॥ त्वदन्विताश्च ये जीवा भविष्यंति कलाविह ॥ पापिनोपि गमिष्यं-
ति निर्भयाः कृष्णमंदिरं ॥१५॥ येषां चित्ते वसेद्भक्तिः सर्वदा प्रेमरूपिणी ॥ न ते पश्यंति
कीनाशं स्वप्नेप्यमलमूर्तयः ॥१६॥ न प्रेतो न पिशाचो वा राक्षसो वासुरोपि वा ॥ भक्तियु-
क्तमनस्कानां स्पर्शनेपि प्रभुर्भवेत् ॥१७॥ न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा ॥ हरिर्हि
साध्यते भक्त्या प्रमाणं तत्र गोपिकाः ॥१८॥ नृणां जन्मसहस्रेण भक्तौ प्रीतिर्हि जायते
कलौ भक्तिः कलौ भक्तिर्भक्त्या कृष्णः पुरः स्थितः ॥१९॥ भक्तिद्रोहकरा ये च ते सीदंति
जगत्त्रये ॥ दुर्वासा दुःखमापन्नः पुरा भक्तविनिंदकः ॥२०॥ अलं व्रतैरलं तीर्थैरलं योगै

मा॰ भा॰
६

रलेमतैः ॥ पुलेत्वानकथ्यालायैभंकिरेकैवमुक्तिदा ॥ ११ ॥ इतिनारदवित्रितेनंमहात्मनि
ग्रामसा ॥ सर्वांगपुष्टिसंयुक्तानारदेवाक्यमब्रवीत् ॥ १२ ॥ भक्तिरुवाच ॥ अहोनारदधन्योसि
प्रीतिस्तेमयिनिश्चला ॥ नकदाचिद्विमुंचामिचित्तेस्थास्यामिसर्वदा ॥ १३ ॥ कृपालुनात्वया
साधोमद्बाधाध्वंसिताक्षणात् ॥ पुत्रयोश्चेतनंनास्तितोबोधयबोधय ॥ १४ ॥ सूतउवा
च तस्यावचःसमाकर्ण्यकारुण्यंनारदोगतः ॥ तयोर्बोधनमारेभेकराग्रेणविमर्द
यन् ॥ १५ ॥ मातेसंयोन्यकर्णेतेशब्दसस्वरं ॥ ज्ञानंप्रबुध्यतांशीघ्रंरेवैराग्यविबुध्यतां ॥ १६
वेदवेदांतघोषैश्चगीतापाठैर्मुहुर्मुहुः ॥ बोध्यमानौतदातेनकथंचिच्चोत्थितौबलात् ॥ १७
नेत्रैरनवलोकंतौजृंभंतौसालसावुभौ ॥ बकवत्पलितौप्रायःशुष्ककाष्ठसमांगकौ ॥ १८
क्षुत्क्षामौतौनिरीक्ष्यैवपुनःस्वापपरायणौ ॥ ऋषिश्चिंतापरोजातःकिंविधेयंमयेतिच ॥ १९
अहोनिद्राकथंयातिवृद्धत्वंचमहत्तरं ॥ चिंतयन्नितिगोविंदंस्मारयामासभार्गव ॥ २० ॥ व्योमवा वि॰ २
ण्यातदैवाभूत्माऋषेखिद्यतामिति ॥ उद्यमःसफलस्तेनभविष्यतिनसंशयः ॥ २१ ॥ ए ६

तदर्थं तत्सत्कर्म सर्वेषांत्वं समाचर॥ नतेकर्माभिधास्येति साधवः साधुभूषणाः॥११॥ सत्कर्मशिरा
कृतेनेनस्विन्नानिद्राहृद्गताल्पयोः॥ नामिष्यन्ति त्वयाद्भुतक्रिः साधवेनः प्रसरिष्यन्ति॥१२॥ इत्याकाश
वचः सुश्रुत्वा तत्र सर्वैरपि विश्रुते॥ नारदो विस्मयं लेभे नेदत्वा नमिवब्रुवन्॥१३॥ श्रीनारद उवाच
अनयाकाशवाण्यापि गोप्यत्वेन निरूपिते॥ किंवा तत्साधनं कार्यं तेन कार्यं भवेन यो॥१४॥ के
भविष्यन्ति तेसन्तः कथं दास्यन्ति साधनं॥ मयाद्य किं प्रकर्तव्यं घटस्कंधो मम भावया॥१५॥ सूत उवाच
नमभावयसंत्याज्य निर्गतो नारदो मुनिः॥ तीर्थं तीर्थं विनिष्क्रम्य पृष्ठन्सागेम्मुनीश्वरान्॥१६॥
श्रुत्वा तत्सर्वं तं सर्वैः किंचिन्निश्चितं नो व्रते॥ असाध्यं केचन प्रोचुर्दुर्ज्ञेयम्मपि चापरे॥१७॥ मूकीभू
तास्तथा चान्ये किंचेन स्वपलायिताः॥ हाहाकारो महानासीत् त्रिलोके विस्मयावहः॥१८॥ वे
दवेदान्तघोषैश्च गीतापाठैर्विबोधितं॥ भक्तिज्ञानविरागाणांनोदतिष्ठत्त्रिकंयदा॥१९॥ उपा
योनापरोस्तीति कर्णेकर्णेजपन्जनाः॥ योगिनानारदेनापि स्वयं न ज्ञायते नितपन्॥२०॥ त

भा॰ मा॰
७

भातदेयम४

कण्ठे शाकवनेव कीर्तितैर्विहमानचैः॥ एवं मुनिगणैः पृष्टे निर्मोघे कुंडशासदे॥४२॥ एतच्छिंतापर :
मोहं वरशीवनमागतः॥ तपश्चरामि चात्रेति तदर्थं कृतनिश्चयः॥४३॥ इदानीं भूरिभाग्येन भवद्भिः संगमा
स्थितः॥ कुमारा वदतां शीघ्रं कृपां कृत्वा ममोपरि॥४४॥ भवंतो योगिनः सर्वे बुद्धिमंतो बहुश्रुताः॥ पंच
हायनसंयुक्ताः पूर्वेजाः॥४५॥ सदा वैकुंठनिलया हरिकीर्तनतत्पराः॥ लीलामृतरसोन्मत्ताः कथा
मात्रैकजीवनाः॥४६॥ हरेस्त्वं शरणं नित्यमिति येषां मुखे वचः॥ अतः कालसमादिष्टा जरा युष्मान्न
बाधते॥४७॥ येषां भ्रूभंगमात्रेण द्वारपाला हरेः श्रुताः॥ भूमौ निपतितौ सद्यो यत्कृपातः परं गतौ॥४८॥
अहो भाग्यस्य योगेन दर्शनं भवतामिह॥ अनुग्रहस्तु कर्तव्यो मयि दीने दयापरैः॥४९॥ अशरीरगिरो
क्तं यत्तत्किं साधनमुच्यतां॥ अनुष्ठेयं कथं तस्या वदंतु सविस्तरं॥५०॥ भक्तिज्ञानविरागाणां सु
खमुत्पद्यते कथं॥ स्थापनं सर्ववर्णेषु प्रेमपूर्वं प्रयत्नतः॥५१॥ कुमारा ऊचुः॥ मा चिंतां कुरु देव
र्षे हर्षं चित्ते समावह॥ उपायः सुखसाध्योत्र वर्तते पूर्व एव हि॥५२॥ अहो नारद धन्योसि विरक्ता

६

नंशिरोमणिः ॥ सदाश्रीकृष्णदासानामग्रणीयोगभास्करः ॥ ५३ ॥ त्वयिविद्धंनमेतथ्यंभक्त्यायेमनव
र्तिनी ॥ त्वरतेकृष्णदासस्यभक्तेस्थापनतासदा ॥ ५४ ॥ मुनिभिर्बहवोलोकेपंथानःप्रकटीकृताः ॥ श्रम
साध्यास्तेचसर्वेप्रायःस्वर्गफलावहाः ॥ ५५ ॥ वैकुंठसाधकःपंथाःसतुगोप्योहिवर्त्तते ॥ तस्योपदेष्टा
पुरुषःप्रायोभाग्येनलभ्यते ॥ ५६ ॥ सत्कर्मतवनिर्दिष्टंव्योमवाचातुयत्पुरा ॥ तदुच्यतेशृणुष्वाद्यस्थि
रचित्तःप्रसन्नधीः ॥ ५७ ॥ द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथापरे ॥ स्वाध्यायज्ञानयज्ञाश्चतेतुकर्मवि
सूचकाः ॥ ५८ ॥ सत्कर्मसूचकोनूनंज्ञानयज्ञःस्मृतोबुधैः ॥ श्रीभागवतकथालापःसगीतोहिशु
कादिभिः ॥ ५९ ॥ भक्तिज्ञानविरागाणांतद्घोषेणबलंमहत् ॥ व्रजिष्यतिद्वयोःकष्टंसुखंभक्तेर्भ
विष्यति ॥ ६० ॥ मलयंहिगमिष्यंतिश्रीमद्भागवतध्वनेः ॥ कलिदोषाइमेसर्वेसिंहशब्दाद्वृकाइव ६१
ज्ञानवैराग्यसंयुक्ताभक्तिःप्रेमरसावहा ॥ प्रतिगेहंप्रतिजनंततःक्रीडांकरिष्यति ॥ ६२ ॥ नारदउवाच
वेदवेदांतघोषैश्चगीतापाठैर्विबोधितं ॥ भक्तिज्ञानविरागाणांनोदतिष्ठत्त्रिकंतदा ६३ श्रीभागव
तकथालापात्कथंबोधमेष्यति ॥ तत्कथासुचवेदार्थःश्लोकेश्लोकेपदेपदे ॥ ६४ ॥ छिंदंतुसंशयं

भा॰ मा॰
८

ह्येनं भवंतो मोहवर्जिताः ॥ विलंबो नात्र कर्तव्यः शरणागतवत्सलाः ॥ १५ ॥ कुमारा ऊचुः ॥ वेदो
पनिषदां साराज्जाता भागवती कथा ॥ अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः ॥ १६ ॥ यथा
दुग्धे स्थितं सर्पिर्न स्वादायोपकल्पते ॥ पृथग्भूतं च हि तद्दिव्यं देवानां रसवर्द्धनं ॥ १७ ॥ इ
क्षूणामपि मध्यांतं शर्करा व्याप्य तिष्ठति ॥ पृथग्भूता च सा मिष्टा तथा भागवती कथा ॥ १८ ॥
इदं भागवतं नाम पुराणं ब्रह्मसंमितं ॥ भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितं ॥ १९ ॥
वेदांते वेदसुस्नाते गीताया अपि कर्तरि ॥ परितापवति व्यासे मुह्यत्यज्ञानसागरे ॥ २० ॥ त
दा त्वया पुरा प्रोक्तं चतुःश्लोकसमन्वितं ॥ तदीयश्रवणात्सद्यो निर्बाधो बादरायणः ॥ २१ ॥
तत्र ते विस्मयः केन यतः प्रश्नकरो भवान् ॥ श्रीमद्भागवतं श्राव्यं शोकदुःखविनाशनं ॥ २२ ॥
श्रीनारद उवाच ॥ यद्दर्शनं च विनिहंत्यशुभानि सद्यः श्रेयस्तनोति भवदुःखदवार्दिता॰ ह
नां ॥ निःशेषशेषमुखगीतकथैकपानाः प्रेमप्रकाशकृतये शरणं गतोस्मि ॥ २३ ॥ भा ८
ग्योदयेन बहुजन्मसमर्जितेन सत्संगमं च लभते पुरुषो यदा वै ॥ अज्ञानहेतुकृतमोहम

हृदंधकारनाशं विधाय हित्वोदयते विवेकः ॥७४॥ इति श्रीपद्मपुराणे उत्तरखंडे श्रीभागव
तमाहात्म्ये कुमारसमागमो नाम द्वितीयोऽध्यायः ॥२॥ श्रीनारद उवाच ॥ ज्ञानयज्ञं करिष्या
मि शुकशास्त्रकथोज्ज्वलं ॥ भक्तिज्ञानविरागाणां स्थापनार्थं प्रयत्नतः ॥१॥ कुत्र कार्यो
मया यज्ञस्थलं तद्वाच्यतामिह ॥ महिमा शुकशास्त्रस्य वक्तव्यो वेदपारगैः ॥२॥ कियद्भि
र्दिवसैः श्राव्या श्रीमद्भागवती कथा ॥ को विधिस्तत्र कर्तव्यो ममेदं वदताधुना ॥३॥
कुमारा ऊचुः ॥ शृणु नारद वक्ष्यामो विनम्राय विवेकिने ॥ गंगाद्वारसमीपे तु तटमानंदना
मकं ॥४॥ नानाऋषिगणैर्जुष्टं देवसिद्धनिषेवितं ॥ नानातरुलताकीर्णं नवकोम
लवालुकं ॥५॥ रम्यमेकांतदेशस्थं हेमपद्मसुसौरभं ॥ यत्समीपस्थजीवानां वैरं चे
तसि न स्थितं ॥६॥ ज्ञानयज्ञस्त्वया तत्र कर्तव्यो ह्यप्रयत्नतः ॥ अपूर्वरसरूपा च कथा तत्र
भविष्यति ॥७॥ पुरःस्थं निर्बलं चैव जराजीर्णकलेवरं ॥ तद्द्वयं च पुरस्कृत्य भ

मा॰ भा॰
५

किस्तत्रगमिष्यति ।७४। यत्रभागवतीवार्त्तातत्रभक्त्यादिकंव्रजेत ॥ कथाशब्दंसमाकर्ण्यत्रिकंत

त्तरुणायते ॥७५॥ सूत उवाच ॥ एवंव्रजकुमारास्तेनारदेनसमंततः ॥ गंगातटेसमाजग्मुः कथापा

नायसत्वराः ॥१॥ यदायातास्तदंतेनसदालोकोहलोप्यभूत ॥ भूर्लोकेदेवलोकेचब्रह्मलोकेत

थैवच ॥२॥ श्रीभागवतपीयूषपानायरसलंपटाः ॥ धावंतोप्याययुः सर्वेप्रथमंयेचवैष्णवाः

भृगुर्वसिष्ठश्च्यवनश्चगौतमोमेधातिथिर्देवलदेवरातौ ॥ रामस्तथागाधिसुतश्चशाकलिर्मृकंडपु

त्रात्रिजपिप्पलादाः ॥३॥ योगेश्वरौव्यासपरासरौचछायाशुकोजाजलिजन्हुमुख्याः सर्वे

प्यमीमुनिगणाः सहपुत्रशिष्यैःस्वस्त्रीभिरायमुरतिप्रणयेनयुक्ताः ॥४॥ वेदांतानिचवेदाश्चमंत्रा

स्तंत्राः समूर्तयः ॥ दशसप्तपुराणानिषट्शास्त्राणितथाययुः ।५॥ गंगाद्याः सरितास्तत्रपु

ष्करादिसरांसिच ॥ क्षेत्राणिचदिशः सर्वादंडकादिवनानिच ॥६॥ नगादयोययुस्तत्रदेवगं ५

धर्वकिंनराः ॥ गुरुत्वात्तत्रनायातान्भृगुः संबोध्यचानयत ।७॥ दीक्षितास्तत्रदेवायदत्तमास

नमन्नमं॥ कर्मभावं दिताः सर्वे निषेदुः कृष्णलालसाः॥१८॥ वैस्नवाश्च विरक्ताश्च न्यासिनो ब्रह्मचारि-
णः॥ मुख्यभागे स्थितास्ते च तदग्रे नारदः स्थितः॥१९॥ एकभागे ऋषिगणास्तथान्यत्र दिवौकसः॥
वेदोपनिषदोन्यत्र तीर्थान्यपि स्त्रियोन्यतः॥२०॥ जयशब्दो नमःशब्दः शंखशब्दस्तथैव च। चूर्णला-
जप्रसूनानां निःक्षेपः सुमहानभूत्॥२१॥ विमानानि समारुह्य कियन्तो देवनायकाः। कल्पवृक्ष-
प्रसूनैस्तान् सर्वान् तत्र समाकिरन्॥२२॥ सूत उवाच॥ एवं तेष्वेकचित्तेषु श्रीमद्भागवतस्य च। माहा-
त्म्यमूचिरे स्पष्टं नारदाय महात्मने॥२३॥ कुमारा ऊचुः॥ अथ ते संप्रवक्ष्यामो माहात्म्यं शुभशास्त्र-
जं॥ यस्य श्रवणमात्रेण मुक्तिः करतले स्थिता॥२४॥ सदा सेव्या सदा सेव्या श्रीमद्भागवती कथाः॥
यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत॥२५॥ ग्रंथोष्टादशसाहस्रो द्वादशस्कंधसंमितः परी-
क्षित्शुकसंवादः शृणु भागवतं च तत्॥२६॥ तावत्संसारचक्रेस्मिन् भ्रमते ज्ञानतः पुमान्॥ याव-
त्कर्णगता नास्ति शुकशास्त्रकथा क्षणं॥२७॥ किं श्रुतैर्बहुभिः शास्त्रैः पुराणैश्च भ्रमावहैः॥ एकं
भागवतं शास्त्रं मुक्तिदानेन गर्जति॥२८॥ कथा भागवतस्यापि नित्यं भवति यद्गृहे॥ तद्गृहं ती-

भा॰मा॰
१०

धेरूपंहिविमलंपापनाशनं ॥१९॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥ शुकशास्त्रकथायाश्चक
लांनार्हंतिषोडशीं २० तावत्पापानिदेहेस्मिन्निवसंतितपोधन ॥ यावन्नश्रूयतेसम्यक्श्रीमद्भागवतंन
बुधैः ॥२१॥ नगंगानगयाकाशीपुष्करंनप्रयागकं ॥ शुकशास्त्रकथायाश्चफलेनसमतांव्रजेत ॥२२॥
श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवं ॥ पठस्वस्वमुखेनैवयदीच्छसिपरांगतिं ॥२३॥ अंतकाले
तुयेनैवश्रूयतेशुकशास्त्रवाक् ॥ प्रीत्यातस्यैववैकुंठंगोविंदोपिप्रयच्छति ॥२४॥ हेमसिंहयुतंचैत
द्वैष्णवायददातिचः ॥ कृष्णेनसहसायुज्यंसपुमांल्लभतेध्रुवं ॥२५॥ आजन्ममात्रमपियेनशठे
नकिंचिच्चित्तंविधायशुकशास्त्रकथानपीता ॥ चांडालवच्चखरवद्बततेननीतंमिथ्यास्वजन्म
जननीजनदुःखभाजा ॥२६॥ जीवच्छवोनिगदितःसतुपापकर्मायेनश्रुतंशुककथावचनंन
किंचित् ॥ धिक्तंनरंपशुसमंभुविभाररूपमेवंवदंतिदिविदेवसमाजमुख्याः ॥२७॥ दुर्लभैवकथा
लोकेश्रीमद्भागवतोद्भवा ॥ कोटिजन्मसमुत्थेनपुण्येनैवतुलभ्यते ॥२८॥ तेनयोगनिधेधीम
न्श्रोतव्यासाप्रयत्नतः ॥ दिनानांनियमोनास्तिसर्वदाश्रवणंमतं ॥२९॥ सत्येनब्रह्मचर्येणसर्वद

याश्रवणंमतं॥ अशक्यत्वात्कलौबोधोविशेषोत्रशुकाज्ञया॥४०॥ मनसश्चाजयाद्रोगात्पुंसांचै
वायुषःक्षयात्॥ कलेर्दोषबहुत्वाच्चसप्ताहश्रवणंमतं॥४१॥ मनोवृत्तिजयश्चैवनियमाचरणंत
था॥ दीक्षांकर्तुंचशक्यत्वात्सप्ताहश्रवणंमतं॥४२॥ अह्नातःश्रवणेनित्यमाघंनावपियत्फ
लं॥ तत्फलंशुकदेवेनसप्ताहश्रवणेकृते॥४३॥ यत्फलंनास्तितपसानयोगेनसमाधिना
अनायासेनतत्सर्वंसप्ताहश्रवणेभवेत्॥४४॥ यज्ञाद्गर्जतिसप्ताहःसप्ताहोगर्जतिव्रतात्॥ त
पसोगर्जतिप्रोच्चैस्तीर्थान्नित्यंहिगर्जति॥४५॥ शौनकउवाच॥ साश्चर्यमेतत्कथितंकथा
नकंज्ञानादिधर्मान्विगणय्यसांप्रतं॥ निःश्रेयसेभागवतंपुराणंजातंकुतोयोगविदादिसू
चकं॥४६॥ सूतउवाच॥ यदाकृष्णोधरांत्यक्त्वास्वपदंगंतुमुद्यतः॥ एकादशंपरिश्रुत्यापुद्धः
वोवाक्यमब्रवीत्॥४७॥ उद्धवउवाच॥ त्वंतुयास्यसिगोविंदभक्तिकार्यंविधायच॥ मच्चित्तेमह
तीचिंताश्रुत्वासुखमावह॥४८॥ आगतोयंकलिर्घोरोभविष्यंतिजनाःखलाः॥ तत्संगेनैव

भा॰ मा॰

११

संतोषिता विधिवत्सत्रं तोसद ॥ ५० ॥ तदा भागवती भूमिर्गीयते ह्येषु यं कर्मा प्रयेन ॥ अन्योन्य ह्यत्र ये तेषां नाता
त्वतः कमललोचन ॥ ५१ ॥ अतः सत्त्वदयाक्रान्तभक्तवत्सलमाव्रज भक्तार्थं समागणे ज्ञातो निरा
कारोपि चिन्मयः ॥ ५२ ॥ त्वद्वियोगेन ते भक्ताः कथं स्थास्यन्ति भूतले ॥ निर्गुणोपासने कष्टमतः
किंचिद्विचारय ॥ ५३ ॥ इत्युद्धववचः श्रुत्वा प्रभाते चिंतयद्धरिः ॥ भक्तावलंबनार्थाय किं विधेयं
मयेति च ॥ ५४ ॥ स्वकीयं यद्भवेत्तेजस्तच्च भागवते दधात् ॥ तिरोधाय प्रविष्टोयं श्रीमद्भागव
तार्णवं ॥ ५५ ॥ तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षा वर्तते हरेः ॥ सेवनाच्छ्रवणात्पाठाद्दर्शनात्पापना
शिनी ॥ ५६ ॥ सप्ताहश्रवणं तेन सर्वेभ्योप्यधिकं कृतं ॥ साधनानि तिरस्कृत्य कलौ धर्मोयमी
रितः ॥ ५७ ॥ दुःखदारिद्र्यदौर्भाग्यपापप्रक्षालनाय च ॥ कामक्रोधजयार्थं हि कलौ धर्मोयमी
रितः ॥ ५८ ॥ अन्यथा वैष्णवी माया देवैरपि सुदुस्त्यजा ॥ कथं त्याज्या भवेत्पुंभिः सप्ताहोतः प्र ११
नगाहे नाम समातः काशितः ॥ ५९ ॥ सूत उवाच ॥ एवं नगाहश्रवणोरुधर्मे प्रकाश्यमाने ऋषिभिः सभायां ॥ आश्चर्य

ध्येमेकं समभून्नदानीं तदच्युते संश्रयाः शौनकत्व ॥९०॥ भक्तौ स्वनौ नौनहृष्णोगरहीनाथमेकरू
पास हृसाविरासीत ॥ श्रीकृष्णगोविंद हरे मुरारे नाथेति नामा निमरूर्वदंती ॥९१॥ तावागता
भागवतार्थभूषा स्वचारुवेषा सदृशः सरस्याः । कथं प्रविष्टाकथमागतेयं मध्येमनीना
मितितर्कयंतः ॥९२॥ ऊचुः कुमाराः वचनं तदानीं कस्यार्थलोभिः प्रतिलाधुनेयं ॥ एवं गिरः
साससमानिशाम्य सनत्कुमारैर्निगदन्मया ॥९३॥ भक्ति उवाच ॥ भवद्भिरेवाघकृतां स्मिपृष्टा
कलिप्रवृत्तापिकथा रसेन ॥ काहं त्विति निशाम्य धुनाप्र वेश्यं गेहान्मज्जातां सुखवद्विरेते ॥९४॥
भक्ते श्रुगोविंदससत्यधर्मी प्रेमैककर्मी भवरोगहर्मी ॥ सर्वं हि निष्ठं स्वसद्विधेयं सश्रयानिरं तरैवै
स्वमानसानि ॥९५॥ ततो विरोधाः कलिजाश्रमेन्वा दृष्टुं न शक्ताः श्रमयोपि लोके ॥ एवं तदा
तावसरे हि भक्तिस्तदा निषण्णा हरिवासचित्ते ॥९६॥ सकलभवनमध्ये निर्धनास्तेपि धन्या निव
सति हृदि येषां श्रीहरे र्भक्तिरेका ॥ हरिरपि निजलोकं सर्वथातो विहाय ॥ प्रविशति हृदि तेषां

भा॰ मा॰
१२

भक्तिस्त्वत्रेणवहृत्ः ॥ ८ ॥ ब्रूमोयमेकिमपिकंमहिमानमेवंज्ञात्मकस्यभक्तिभागवतामियस्य
यत्संश्रयान्निगदनाल्लभतेसुवक्ताश्रोतापिकृष्णसमतामलमन्यधर्मैः ॥ ८९ ॥ श्रीइति श्रीपद्मपुरा
णेउत्तरखंडे भागवतमाहात्म्येतृतीयोध्यायः ॥ ३ ॥ सूतउवाच ॥ अथवैष्णवचित्तेषुदृष्ट्वाभक्ति
मलौकिकीं ॥ निजलोकंपरित्यज्यभगवान्भक्तवत्सलः ॥ १ ॥ वनमालीघनश्यामःपीतवा
सामनोहरः कांचीकलापरुचिरोल्लसन्मकरकुंडलः ॥ २ ॥ त्रिभंगललितश्चारुकौस्तुभेनवि
राजितः कोटिमन्मथलावण्योहरिचंदनचर्चितः ॥ परमानंदचिन्मूर्तिर्मधुरोमुरलीधरः आ
विवेशस्वभक्तानांहृदयान्यमलानिच ॥ ४ ॥ वैकुंठवासिनोयेचवैष्णवाउद्धवादयः ॥ तत्कथा
श्रवणार्थंतेगूढरूपेणसंस्थिताः ॥ तदाजयजयारावोरसपुष्टिरलौकिकी ॥ चूर्णप्रसूनर
हृष्टिश्चमुहुःशंखरवोप्यभूत् ॥ ६ ॥ तत्सभासंस्थितानांचगेहदेहात्मविस्मृतिः ॥ दृष्ट्वाचतन्मयावस्थां १२
नारदोवाक्यमब्रवीत् ॥ ७ ॥ अलौकिकोयंमहिमामुनीश्वराःसप्ताहजन्योद्यविलोकितोमया व

मूढाः शठाः येपञ्चपवित्रितमोघसर्वे पितृभिः पापतपाविमोचनि ॥ ८ ॥ अतोऽन्यलोकेन नुनास्ति
किंचिच्चित्तस्य शोधापकलोपविद्धे ॥ अघौघविध्वंसकरीकथैव कथासमाने भुवि नास्ति चान्य
त ॥ ९ ॥ केचैवनष्टबुद्धिं निवदंत्यसत्यं समाहूयन्तेनकथापनेन ॥ कृपालुभिर्लोकहिते विचार्य प्रका
शितः कोपि न केन मार्गे ॥ १० ॥ कथाज्ञा कृष्णाज्ञ ॥ ये मानवाः पापकृतोपि सर्वे दुःखसहाऽश्राव्यां ॥ ११ ॥
नाविमार्गः क्रोधाग्निदग्धाः कुटिलाश्च कामिनः समाहूयन्तेनकलोभनेति ॥ १२ ॥ सत्येन
हीनाः पितृमातृदूषकाः तुलाः कुलाश्चाश्रमधर्मवर्जिताः ॥ ये दोषि कामं न परिशोधयंति
सकाः समाहूयन्तेनकलोभनेति ॥ १३ ॥ पंचोग्रपापाः छलच्छद्मकारिणः कृपाविशाचा
विलनिंद्यपाश्च ॥ ब्रह्मस्वदुष्टाश्च वभिचारकारिणः समाहूयन्तेनकलोभनेति ॥ १४ ॥ का
येन वाचा मनसापि पातकं नित्यं प्रकुर्वंति शठाहृहेनये ॥ परस्वदुष्टा मलिना दुराचाराः
समाहूयन्तेनकलोभनेति ॥ १५ ॥ अयनेकर्णीते पियमिश्नितसूस्रयुगानेवं ॥ पस्पयेश्रवणमा

नगर

भा॰ मा॰ १३

त्रेणापापहानिः परं भवेत् ॥ ६ ॥ तुंगभद्रातटे पूर्वमभूत्पत्तनमुत्तमं ॥ यत्र वर्णाः स्वधर्मेण सत्यस
त्कर्मतत्पराः ॥ ७ ॥ आत्मदेवः पुरे तस्मिन्सर्ववेदविसारदः श्रौतस्मार्तेषु संस्नातो द्वितीय इव भास्क
रः ॥ ८ ॥ भिक्षुको वित्तवान्लोके तस्य प्रिया धुंधुली स्मृता ॥ स्ववाक्यस्थापका नित्यं सुंदरी स्वकुलोद्भ
वा ॥ ९ ॥ लोकवार्तारता क्रूरा प्रायशो बहुजल्पका ॥ सूरा च गृहकृत्येषु कृपणा कलहप्रिया ॥ १० ॥
एवं निवसतोः प्रेम्णा दंपत्यो रमणपत्ययोः ॥ अर्थाः कामास्तयोरासन्न सुखाय गृहादिकं ॥ ११ ॥ पश्चाद्धर्माः समा
रब्धास्ताभ्यां संतानहेतवे ॥ गोभूहिरण्यवासांसि दीनेभ्यो यच्छतोः सदा ॥ १२ ॥ धनार्द्धं धर्ममार्गेण ताभ्यां
संतानहेतवे ॥ गोभूहिरण्यवासांसि दीनेभ्यो यच्छतोः सदा ॥ एकदा स द्विजो दुःखाद्गृहं त्यक्त्वा गतो वने
मध्याह्ने तृषितो यातस्तडागं समुपेयिवान् ॥ १३ ॥ पीत्वा जलं निषण्णस्तु प्रजादुःखेन कर्षितः मुहू
र्तादपि तत्रैव संन्यासी कश्चिदागतः ॥ १४ ॥ दृष्ट्वा पीतजलं तं तु विप्रो जातस्तदंतिकं नत्वा च पादयोस्त
स्य निःश्वसन्संस्थितः पुरः ॥ १५ ॥ यतिरुवाच ॥ कथं रोदिषि विप्र त्वं का ते चिंता बलीयसी ॥ वद त्वं स॰ १३

त्वंमयंस्वस्थः त्वमकारणं।२६॥ ब्राह्मण॥ वाच॥ किंनुवानिस्पृहेणेदं स्वंशरीरंपापेनसंचितं॥ मरीचयः स्व
र्वेनास्तेलोपंकरोसिमयपभुंजते॥२७॥ महतेनैवगरुडं निशीतादेवाहितानयः॥ मज्ञासत्वेनस्वन्तोहंमायणं
स्वकमिहागतः॥२८॥ विज्ञानिवितंप्रज्ञाहीनेंधिग्गृहं च धर्मंविना धिगधनेचानपत्यस्य धिक्कुलंसेनतिं
विना॥२९॥ पात्स्यतेयामयाधेनुः सावैआसर्वयाभवेत॥ योमयारोपितोहन्तः सोपिवैअवमाययेत् ३
यत्कलेसद्दाघातेशीघ्रंनचविशुष्यति॥ निर्भयस्यानपत्यस्य किमनोनीवितेनमे॥३१॥ त्वत्कामसकं
दोषैस्तत्ताङ्कैः एवपीडितः॥ नदातस्ययतेश्चित्ते कस्यामभूर्वहरीयसौ॥३२॥ नज्ञालाद्दरमालाव्यवा
चयामासयोगवान्॥ सर्वेशाबापतिः पश्चाद्दिपमृवेमविलत्वं॥३३॥ पतिः॥ वाच॥ सत्यविषमयाते
पिमाश्वंतविलोकितं॥ सम्मजन्मावधितवपुत्रोनैवच॥३४॥ मुंचांसानेप्रज्ञारूपंवमिच्छाकर्मेणोगतिः नैवव
विवेकंसमाश्रित्यत्वं संसारवासनां॥३५॥ सन्ततेः संगतोर्हः खमवाप्यांगभुमनधा रेसंचायक्त
हंवाशांसंन्यासेसर्वेषांसदाविं॥३६॥ ब्राह्मण उवाच॥ विवेकेनभवेत्किंमेपुत्रेहिहिवलादपि॥ नोचेन्मता
मद्दमाणानलदग्धोकमृच्छितः॥३७॥ पुत्रादिसत्वहीनोयंसंन्यासः श्रेष्ठपवहि॥ महदस्यः सप्तसोलो

भो· मा·
१४

लोकेवृत्तवैपीतसमाहृतः ॥४८॥ इति विमानग्रहं दृष्ट्वा प्रवीरस्तनयो धनः ॥ विचके नगरेः कष्टं विविलेखवि
मानेनाम ॥४९॥ न यास्यामि सखे ग्रामं पादेवहतो यमः ॥ अतोहरोन पुक्रलोयर्थे ने किंवदामहं ॥५०॥
नस्माग्रहं समालोक्य फलमेकं नदत्तवान ॥ इदं भतपथदन्मे नरैः भुक्तो भविष्यति ॥५१॥ सत्यं शौचं दं
याहानमेक भक्तं च भोजनं ॥ वर्षोवपिस्त्रिया कार्ये तेन पुत्रो निनिर्मलः ॥५२॥ एवमन्मकापधर्मो योगी
विश स्वगृहमागतः ॥ पत्न्याः पारौ फलं दत्वा सर्वं ध्यानं कृतवान ॥५३॥ तत्काणी कुलात नससत्य मा
ग्रेवकुरोदहं ॥ अहो चित्रं नाम सोमरत्नफलं वाहं न भक्तने ॥५४॥ फलं भक्षेण गर्भः स्यातगर्भेणोद्वह
हिका ॥ सत्यमत्रांतरेतोः शाक्तिरेहकार्थे कथं भवेत ॥५५॥ तिर्यक्कुचेदागतो मम्मूलदामेमरणं भवेत
प्रस्तनौदारुणांहःरवे सकुमारीकुपेसहेत ॥५६॥ सत्ता याम्र्य पिसर्वे च धनेनरासंहरेनदा ॥ सत्या नं
गौवादिनियमोझराणाधः सहस्रपते ॥५७॥ लालने पालने रः खैप सूनम याश्च विधीयते ॥ वंध्या वा विधवा
नारीगृहविनी चेन्निसेमति ॥५८॥ एवं ज्ञानकेयोगेन तत्फलं नैवभक्षितं ॥ समाप्त्यै फलं भक्तं भुक्तं १४
वेतिनये रितं ॥५९॥ एकदा भगिनी तस्या लक्ष्मं स्वेच्छया गता ॥ नदग्रे कथितं सर्वं चिंतेनिमहत्मोति

भक्ती

मे॥५१॥ सुखंवसातेनदुःखेनयत्नेकस्यापि किं॥ साब्रवीन्ममगर्भोस्तितंदास्यामिप्रसूतितः॥५२॥ताव
त्कालंममगर्भेवगुप्तातिष्ठगृहेसुखं वित्तंत्वमत्पतेर्यच्छसतेदास्यतिबालकं॥५३॥षाण्मासिकोमृतो
बालःइतिलोकेवदिष्यति तंबालंपोषयिष्यामिनित्यमागत्यतेगृहे॥५४॥फलंभवत्ययधेनोस्त्वंप
रीक्षार्थंतुसाधयते तन्नरायचितंसर्वंतथैववत्सोस्वभावतः॥५५॥अथकालेनसानारीप्रसूताबालकं
तदा आनीयजनकोबालंदृष्ट्वसोधुंधलीदरी॥५६॥तयाचकथितंभर्त्रेप्रसूतः सुखमर्भकः
लोकस्यसुखमुत्पन्नमात्मदेवप्रजोदयात्॥५७॥ददौदानंद्विजातिभ्योजातकर्मविधायच॥गी
तवादित्रघोषोभूत्तद्वारेमंगलंबहु॥५८॥भर्त्रग्रेसाब्रवीद्वाक्यंस्तनंनास्तिकुचेमम॥अन्यस्तन्येनपुष्णा
कथंपुष्णामिबालकं॥५९॥ मत्स्वसायाःप्रसूतायाःमृतोबालस्तुवर्तते॥तामाकार्यगृहेरक्षसाते
र्भंपोषयिष्यति॥६०॥पतिनातत्कृतंसर्वंपुत्ररक्षणहेतवे॥पुत्रस्यधुंधकारीतिनाममाताप्रतिष्ठितं
त्रिमासेनिर्गतेचाथसाधेनुःसुषुवेर्भकं॥सर्वांगसुंदरंदिव्यंनिर्मलंकनकप्रभं॥६२॥दृष्ट्वाप्रसन्नो
विप्रस्तुसंस्कारान्स्वयमादधे॥मत्वाश्चर्यंजनाःसर्वेदिदृक्षार्थंसमागताः॥६३॥भाग्योदयोधुना॰

भा॰ मा॰ जातस्त्वात्मदेवस्यपश्यत ॥ धेन्वांबालःप्रसूतस्तुदेवरूपीतिकौतुकं ॥ ४४ ॥ नज्ञातंतद्दृष्टंतत्केनापि
विधियोगतः ॥ गोकर्णंचसुतंदृष्ट्वागोकर्णनामचाकरोत ॥ ४५ ॥ किंचित्कालेनतौजातौतरुणौतनया
१५ वुभौ ॥ गोकर्णःपंडितोज्ञानीधुंधुकारीमहाखलः ॥ ४६ ॥ स्नानशौचक्रियाहीनोदुर्भक्षीक्रोधसंयुतः
दुःपरिग्रहकर्ताचशवहस्तेनभोजनी ॥ ४७ ॥ चौरःसर्वजनद्वेषीपरवेश्मप्रदीपकः लालनायार्भका
न्धृत्वासद्यःकूपेनिपातयेत ॥ ४८ ॥ हिंसकःशस्त्रधारीचदीनांधानांप्रपीडिकः चांडालाभिरतोनि
त्यंपाशहस्तःश्वसंगतः ॥ ४९ ॥ तेनवेश्याकुसंगेनपैत्र्यंवित्तंचनाशितं ॥ एकदापितरौताडयपात्राणि
स्वगृहमाहरत ॥ ५० ॥ तत्पिताकृपणःप्रोच्चैर्धनहीनोरुरोदह ॥ वंध्यत्वंतुसमीचीनंकुपुत्रोदुःखदाय
कः ॥ ५१ ॥ क्वतिष्ठामिक्वगच्छामिकोमेदुःखंव्यपोहयेत ॥ प्राणांस्त्यजामिदुःखेनहाकष्टंममसंस्थि
तं ॥ ५२ ॥ तदानींतुसमागत्यगोकर्णोज्ञानसंयुतः ॥ बोधयामासजनकंवैराग्यंपरिदर्शयन ॥ ५३
असारःखलुसंसारोदुःखरूपीविमोहकः ॥ कःसुतःकस्यचधनंस्नेहवाञ्ज्वलतेनिशं ॥ ५४ ॥ न १५
चेंद्रस्यसुखंकिंचिन्नसुखंचक्रवर्तिनः ॥ सुखमेवविरक्तस्यमुनेरेकांतजीविनः ॥ ५५ ॥ मुंचाज्ञानं

प्रजाहृत्पंमोहतोनरकेगतिः ॥ निपतिष्यतिदेहोयंसर्वेत्स्वकावनेव्रजनत ॥ १९ ॥ तद्वाक्यंतस्यमाकर्ण्य
गेतकामः पिताब्रवीत् किंकर्तव्यंवनेनातनत्वंवदसिविस्तरं ॥ ११ ॥ श्रेयंधकूपेस्नेहपाशाबद्धः पंकोरेद्द
शाठ्ठः कर्मेणापतितोस्नंनेमाकुरुदयानिधे ॥ गोकर्णउवाच ॥ हेहेस्त्रिमोसकृचिरेसमतिंतसगागरेस्ति
जलेनापासतादिवसरामसतोविमुच्य ॥ पश्यानिशेजगादिदंतणाभंगनिष्ठवैराग्यरागुरसिकोभव
भक्तिनिष्ठः ॥ १४ ॥ धर्मभजस्वसततंत्यजलोकधर्मान्सेवस्वसाधुपुरुषंजहिकामतृष्णा अन्यस्यदो
षगुणचिंतनमाशुमुक्त्वासेवाकथारसमहोनितरांपिबत्वं ॥ ८० ॥ एवंसुतोक्तवसतोपिगृहंविहा
यप्रयातोवनंस्थिरमतिर्गतषष्टिवर्षः ॥ युक्तोहरेरहर्निशंपरिचर्ययासौश्रीकृष्णमापनियतंदशमा
स्यपाठात् ॥ ८१ ॥ इतिश्रीश्रीपद्मपुराणेउत्तरखंडे श्रमो णोनामचतुर्थो ध्यायः ॥ ४ ॥ सूतउवा
च ॥ पितर्युपरतेतेनजननीताडिताभृशं ॥ कविंतंनिश्चयेदहिदृनिषोलतज्ञानचेत ॥ १ ॥ रतिलहा
कपसेवाशाम्लनन्याप्रवरः स्वतः ॥ रूपपातः कृतोराधेतेनसानिधनंगता ॥ २ ॥ गोकर्णाख्योधायागा
योनिर्गतोयोगसंस्थितः ॥ तः खंनसखेंनसपनवैरीनचाबांधवः ॥ ३ ॥ धुंधकारीगृहेतिष्ठत्स्वयंवया

भा° मा°
१९

त्रयवधूव्रतः । ग्रन्थकर्मकृन्नो वनन्तोषणाविमूरधीः ॥ ४ ॥ एकदाजलदासालाल्भ्रषणानाभिलिख्यवः
नरंहेनिगेतोगेहाकाम्योधोमनमस्स्वन ५ ॥ घनन्तलनखसंहूत्नविनेवेशमजुनगतेः । नाभोयकत्ताव
स्वालिभूषणानिकिंयेतिच ६ ॥ वरुविसेचपंरहृगरोयेनद्यौविषणतिनिखिते ॥ प्रतोयेगम्रयेमृद्दमला म
भिः किंनहृन्यते । ७ ॥ निद्रत्येनेमद्दीलायेपासासोपरजरचित इतिनानिम्रयकलालमसेवथ्रः
खिमभिः । ८ ॥ पाशंकेदविधाबास्यतन्नस्तनुमपचक्रुः नरितेनमामारसौविनावुत्कालकदाभवन् ।
नम्रोगगारसमृद्दांश्रुतन्त्रत्रिविविविविति ॥ अग्निन्नालानिकः त्रिनघ्राजलोनिधनेगनः । ९ ॥ नदेहेम
मृयेनेषाघसाहृसिकाः त्रिपः ॥ नत्तानेतरहसनकेनापीदंनदेवच ॥ १० ॥ लोकैः एशवदंनिस्महृते
यांनयियोहिनः ॥ आगमिष्यतिवेषेसिनेवितलोभविकथितः ॥ ११ ॥ स्त्रीणांनैवनविश्वासोः नता
नोकारयेद्बुधः ॥ विश्वासेपास्यतोमृदसरुः सैवैः परिभूयते ॥ १२ ॥ लधामयंवचोपासाकामिनारसव
र्हते ॥ हृदयंत्तरधाराभं प्रियः कोनामयोविनेः । १३ ॥ संहृत्यचित्तंनानानः जलादावरुमदेकाः भ्रंथका
रीवमूवाचमहान्वेतः जकमेनः । १४ ॥ वान्यारूपधरोलिनंधावनूहशादिगेनरे ॥ श्रीनालयपरि १९

क्विशेनिराहारःपिपासितः॥१७॥नलेभेशरणंक्वापिहादैवेतिमुहुर्वदन्॥कियत्कालेनगोकर्णो
मृतंलोकादबुध्यतः॥१८॥अनाथंतंविदित्वैवगयाश्राद्धमचीकरत्॥यस्मिंस्तीर्थेतसंयातितत्रस्मि
न्श्राद्धमवर्तयत्॥१९॥एवंभ्रमन्सगोकर्णःस्वपुरंसमुपेयिवान्॥रात्रौगृहांगणेस्वप्तुमागतोऽ
लक्षितःपरैः॥२०॥तत्रसुप्तंसविज्ञायधुंधकारीस्वबांधवं॥निशीथेदर्शयामासमहारौद्रतरंव
पुः॥२१॥सकृन्मेषःसकृद्दंतीसकृच्चमहिषोभवत्॥सकृदिंद्रःसकृच्चाग्निःपुनश्चपुरुषोभव
त्॥२२॥वैपरीत्यमिदंदृष्ट्वागोकर्णोधैर्यसंयुतः॥अयंदुर्गतिकःकोपिनिश्चित्याथतमब्रवीत्२
गोकर्णउवाच॥कस्त्वमुग्रतरोरात्रौकुतोयातोदशामिमां॥किंवाप्रेतःपिशाचोवाराक्षसोसी
तिशंसनः॥२४॥सूतउवाच॥एवंपृष्टस्तदातेनरुरोदोच्चैःपुनःपुनः॥अशक्तोवचनोच्चारेसंज्ञामा
त्रंचकारह॥२५॥ततोंजलौजलंकृत्वागोकर्णस्तमुदीरयत्॥तत्सेकाद्गतपापोसौप्रवक्तुमु
पचक्रमे॥२६॥प्रेतउवाच॥अहंभ्रातात्वदीयोस्मिधुंधुकारीतिनामतः॥स्वकीयेनैवदोषेणब्र
ह्मत्वंनाशितंमया॥२७॥कर्मणोनास्तिसंख्यामेमहाज्ञानेविवर्तिनः॥लोकानांहिंसकःसो

भा॰ मा॰
७

हंस्त्रीभिर्दुःखेन मारितः ॥ २८ ॥ अतः प्रेतत्वमापन्नो दुर्दशां च वहाम्यहं ॥ वाताहारेण जीवामि दैवाधी
नफलोदयः ॥ २९ ॥ अहो बंधो कृपासिंधो भ्रातर्मामाशु मोचय ॥ गोकर्णो वचनं श्रुत्वा तस्मै वाक्यमथा
ब्रवीत ॥ ३० ॥ गोक॰ उ॰ च ॥ त्वदर्थं च गयापिंडो मया दत्तो विधानतः ॥ तत्कथं नैव मुक्तोसि ममाश्चर्य
मिदं महत ॥ ३१ ॥ गयाश्राद्धान्न मुक्तिश्चेदुपायो नापरस्त्विहः ॥ किं विधेयं मया प्रेत तत्त्वं वद सविस्तरं
३२ ॥ प्रेत उवाच ॥ गयाश्राद्धशतेनापि मुक्तिर्मे न भविष्यति ॥ उपायमपरं किंचित्त्वं विचारय सांप्रतं ॥ ३३ ॥
इति तद्वाक्यमाकर्ण्य गोकर्णो विस्मयं गतः ॥ शतश्राद्धैर्न मुक्तिश्चेदसाध्यं मोचनं तव ॥ ३४ ॥ इदानीं तु
निजं स्थानमातिष्ठ प्रेत निर्भयः ॥ त्वन्मुक्तिसाधनं किंचिदाचरिष्ये विचार्य च ॥ धुंधुकारी निजं स्थानं
तेनादिष्टस्ततो गतः ॥ गोकर्णश्चिंतयामास तां रात्रिं न तदध्यगात ॥ ३६ ॥ प्रातस्तमागतं दृष्ट्वा लोकाः प्री
त्या समागताः ॥ तत्सर्वं कथितं तेन यज्जातं च यथा निशा ॥ ३७ ॥ विद्वांसो योगनिष्ठाश्च ज्ञानिनो ब्रह्मवादि
नः ॥ तन्मुक्तिं नैव तेऽपश्यन्पश्यंतः शास्त्रसंचयान ॥ ३८ ॥ ततः सर्वैः सूर्यवाक्यं तन्मुक्तौ स्थापितं परं
गोकर्णः स्तंभनं चक्रे सूर्यवेगस्य वै तदा ॥ ३९ ॥ तुभ्यं नमो जगत्साक्षिन्ब्रूहि मे मुक्तिहेतुकं तच्छ्रु १७

माहूतः सूर्यः स्फुरितमस्मिभाषत ॥४०॥ श्रीमद्भागवतात्मकं किं सप्ताहेन वाचनं कृत ॥ इति सूर्येव
चः सर्वैर्हि निरूपितं विश्रुतं ॥४१॥ सर्वेऽब्रुवन् प्रयत्नेन कर्मणे यं सुकरं निदं ॥ गोकर्णो निश्चयं कृत्वा वा
चनाय प्रवर्तितः ॥४२॥ तत्र संश्रवणायैव ये देशग्रामाज्जना ययुः ॥ पंगवंधवृद्धमंदाश्चेति पिपाप
क्षयाय वै ॥४३॥ समाजस्तु महान् जातो देवविस्मयकारकः ॥ यदैवासनमास्थाय गोकर्णोऽकथय
त्कथां ॥४४॥ स प्रेतोऽपि तदायातः स्थानं पश्यन्नितस्ततः ॥ सप्तग्रंथियुतं तत्रापश्यत्कीचकमुच्छ्रितं
तन्मूलच्छिद्रमाविश्य श्रवणार्थं स्थितो ह्यसौ ॥ वायुरूपी स्थितिं कर्तुमशक्तो वंशमाविशत् ॥४५॥
वैष्णवं ब्राह्मणं मुख्यं श्रोतारं परिकल्प्य सः ॥ प्रथमस्कंधतः स्पष्टमाख्यानं धेनुजोऽकरोत् ॥४६॥
दिनांते रक्षिता गाथा तदा चित्रं बभूव ह ॥ वंशैकग्रंथिभेदोऽभूत्सशब्दः पश्यतां सतां ॥४७॥ द्विती
येऽह्नि तथा सायं द्वितीयग्रंथिभेदनं ॥ तृतीये च तथा सायं तृतीयग्रंथिभेदनं ॥४८॥ एवं सप्तदिनैर्वा म
या स सप्तग्रंथिविभेदनं ॥ कृत्वा स द्वादशस्कंधश्रवणात्प्रेततां जहौ ॥४९॥ दिव्यरूपधरो जातस्तुलसी
दाममंडितः ॥ पीतवासा घनश्यामो मुकुटी कुंडलान्वितः ॥५०॥ ननाम भ्रातरं सद्यो गोकर्णमिति

भा॰ मा॰
१८

वाब्रवीत् ॥ त्वयाहं मोचितो बंधो कृपया मेनकस्मलात् ॥ ५१ ॥ धन्यासि भागवतीवार्त्तायेन पीडा वि
नाशिनी ॥ सत्याहो पितयाधन्यः कृतो लोकफलप्रदः ॥ ५२ ॥ कंपंते सर्वपापानि सप्ताहश्रवणे
स्थिते ॥ अस्माकं प्रलयं सद्यः कथं चैव करिष्यति ॥ ५३ ॥ आर्द्रं शुष्कं लघु स्थूलं वाङ्मनः कर्मभिः कृतं
श्रवणं विदहेत्पापं पावकः समिधो यथा ॥ ५४ ॥ अस्मिन्वै भारते वर्षे सूरिभिर्देवसंसदि ॥ अक
थाश्राविणां पुंसां निःफलं जन्म कीर्तितं ॥ ५५ ॥ किं मोहतो रक्षितेन सुपुष्टेन बलीयसा ॥ अ
ध्रुवेण शरीरेण शुकशास्त्रकथां विना ॥ ५६ ॥ अस्थिस्तंभं स्नायुबंधं मांसशोणितलेपितं ॥ च
र्मावनद्धं दुर्गंधं पात्रं मूत्रपुरीषयोः ॥ ५७ ॥ जराशोकविपाकार्त्तं रोगमंदिरमातुरं ॥ दुःपूरं दुर्द्धरं दुष्टं
सदोषं क्षणभंगुरं ॥ ५८ ॥ कृमिविड्भस्मसंज्ञांतं शरीरमिति वर्णितं ॥ अस्थिरेणास्थिरं कर्म कु
तो यं साधयेन्नहि ॥ ५९ ॥ यत्प्रातः संस्कृतं चान्नं सायं तच्च विनश्यति तदीयरससंपुष्टे काये
का नाम नित्यता ॥ ६० ॥ सप्ताहश्रवणाल्लोके प्राप्यते निकटे हरिः ॥ अतो दोषनिवृत्यर्थमेतदे
व हि साधनं ॥ बुद्बुदा इव तोयेषु मशका इव जंतुषु ॥ जायंते मरणायैव कथाश्रवणवर्जिताः ६१

नरस्य मुक्तवंशस्य घचग्रंथिविभेदने ॥ चिरं किमत तदा चित्रं ग्रंथिभेदं कथाश्रवात् ॥ ६३ ॥ छिद्यते हृ
दयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि संहृच्छ्रवणे कृते ॥ ६४ ॥ संसारकर्दमालेप
प्रक्षालनपरीपसि ॥ कथातीर्थे स्थिते चित्ते मुक्तिरेव बुधैः स्मृता ॥ ६५ ॥ एवं वदति वै तस्मिन्वि
मानमपतन्महत् ॥ वैकुंठवासिभिर्युक्तमस्फुरद्दीप्तमंडलं ॥ ६६ ॥ सर्वे पापपश्यंतो भेजे विमानं धुं
धुलीसुतः ॥ विमाने वैष्णवान्वीक्ष्य गोकर्णो वाक्यमब्रवीत् ॥ ६७ ॥ गोकर्ण उवाच ॥ अत्रैवे
बहवः संति श्रोतारो मम निर्मलाः ॥ आनीतानि विमानानि तेषां न युगपत्कुतः ॥ ६८ ॥ श्र
वणं सममेवेन सर्वेषामिह दृश्यते ॥ फलभेदः कुतो जातः प्रब्रुवंतु हरिप्रियाः ॥ ६९ ॥
हरिदासा ऊचुः ॥ श्रवणस्य विभेदेन फलभेदोत्र संस्थितः ॥ श्रवणं तु कृतं सर्वैर्न तथा म
ननं कृतं ॥ ७० ॥ मननादि तथैतेन स्थिरं चित्तं कृतं हृदि ॥ अदृढं च हतं ज्ञानं प्रमादेन हतं श्रुतं
संदिग्धो विहतो मंत्रो व्यग्रचित्तो हतो जपः ॥ अवैष्णवो हतो देशो हतं श्राद्धमपात्रकं ॥ ७१ ॥
हतमश्रोत्रिये दानमनाचारहतं कुलं विश्वासो गुरुवाक्ये न स्वस्मिन्दीनत्वभावना ॥ ७२ ॥

भा॰ मा॰ मनोदोषजनघस्त्रैवकथयांनिर्मलामतिः॥ एवमोदोषजनघस्त्रैवकथयावांनिर्मलामतिः
१९ एवमादिकृतंचेत्स्यात्तदावैश्रवणेफलं॥७५॥पुनःश्रवीतेसर्वैर्वाधैवजेरेवसन्निधुवं॥गो
कर्णकृतेवगोविंदेगोलोकेदासन्निध्रुवे॥७६॥एवमस्तावपुरःसर्वैर्वैकुंठेहरिकीर्तनात्
श्रावणेमासिगोकर्णःकथामूचेतमापुनः॥७७॥समराशिश्रुतीभूयश्रवणात्तेःकृतेफ
लं॥कथासमाप्तौघनात्तेस्पयनातबुनादर॥७८॥विमानैःसहभक्तैश्चहरिराविर्बभूवह
जयशब्दैःनमःशब्दैस्तत्रासनवरेवसलदा॥पांचजन्यध्वनिंचक्रेहर्षात्तत्रहरिःस्वयं॥गो
कर्णंतसमालिंग्याकरोत्स्वसदृशंहरिः॥७९॥श्रोतृनन्यानघनश्यामान्पीतकौशेयवा
ससः॥किरीटिनःकुंडलिनस्तथाचक्रेहरिःक्षणात्॥८०॥तद्ग्रामेयेस्थिताजीवाआश्वचां
डालजातयः॥८१॥विमानेस्थापितास्तेपिगोकर्णकृपयातदा॥प्रेषिताहरिलोकेतेय
त्रगच्छंतियोगिनः॥८२॥गोकर्णेनसगोपालोगोलोकंलोकवल्लभं॥कथाश्रवणतः
प्रीतोनिर्ययौभक्तवत्सलः॥८३॥अयोध्यावासिनःपूर्वंयथारामेणसंगताः॥तथा १९

कृष्णेनैते नीताः गोलोकं योगिदुर्लभं ॥८४॥ यत्र सूर्यो न सोमश्च सिद्ध्या नो न गतिः कदा ॥ तं लो
कं विगतमालिन्यं श्रीमद्भागवतश्रवात् ॥८५॥ श्रुमोद्यते किं फलमेतदन्यल्लेभे समाहृत्य येन कथामृत
चितं ॥ कस्मैन गोकस्मैकथा लदाये पीतश्चैतेनाभगतान भूपः ॥८६॥ वातोज्ञयस्त्रीशानदेहश्लो
पणोस्य यो भिकृत्ये स्थिरकालसंचितैः ॥ पीमैश्वसंयेतिन रानूलोगतिं समाहृत्य याश्वषणोन।
योगतिं ॥८७॥ इतिहासमिमं पुण्यं शोरिस्तां पिमलीश्वरः ॥ पठनेविमकस्याश्वमानेदपारिस्तु
न ॥८८॥ आख्यानमेतत्परमेमपवित्रं श्रुतं सकृत्सा ग्दहेद्धौं ॥ श्राद्धेमघुलं पितृल्मिमावहे
त्रिसयंतपातादप्रनमं वैच ॥८९॥ इति श्रीपद्मपुराणे उत्तरखंडे गौकसंगपावृष्णे मे नाम पंचमोध्या
यः ॥५॥ कुमारा ऊचुः ॥ अथ तेभ्यः सवस्तामः समाहृत्यवणोविधिं ॥ सहायैर्वे प्रमिश्चैव याघः
साध्यो विधिः स्मृतः ॥ दैवज्ञेन समाहृत्य महनेचेत्कृष्णपत्नतः ॥ विवाहेयादृशोचितं तादृशो
दृढिकल्पयेत ॥२॥ नभस्य चाश्विनोर्ज्जौ च मार्गशीर्षः शुचिर्नभः ॥ पंचमासाः कथारंभे श्रो
तृणां मोक्षसूचकाः ॥३॥ मासानां यानि देयानि तानि त्याज्यानि सर्वथा ॥ सहायाश्चतपसयक

तेषां स्तोत्रमाख्येये ॥ ४ ॥ देशो देशे न यासे ये वा नीये छायाश्च यत्नतः ॥ भविष्यनिकयाचायश्चागांत
यं कुर्यात् विधिभिः ॥ ५ ॥ हरिहरिकथाकेचि ॥ हरेश्चामृतकीर्तनाः स्त्रियः स्वद्वारयोषेच्चते कोवा षोष
तोभवेत् ॥ ६ ॥ देशे देशे विरक्ता ये वैलवाः कीर्तने नास्तिकाः ॥ तेषेव पर्वसंश्येषंत लेखवमितीरि
तं ॥ ७ ॥ सर्वासमाजोभविता समरावेसहलेभं ॥ यश्रवारसरूपा च कथानवभविष्यति ॥ ८ ॥ श्रीभाग
वतपीठस्वपानाचारसलेपरा ॥ भवंतस्यतरशीघ्रमाचांतश्येमतनसराः ॥ ९ ॥ नावकाशः कस
विद्यारिनमायंतयापिवा ॥ सर्वेषामागमनेकार्थे दर्पोमैवसहलेभः ॥ १० ॥ एवमाकारणं तेषां
मेवेवविनयेनच अगोनकानंसर्वेषां वाबस्यानानिकल्पयेत् ॥ ११ ॥ तीर्थेवापिवनेवापिगृहे
श्री वा श्रवसोसते ॥ विशालावसुधायत्र कर्तव्यंतनकथास्थले ॥ १२ ॥ शोधनं मार्जनं भूमेर्लेपनं धात
मंडलं ॥ गृहोपकरणमुद्धृत्य गृहकोणे निवेशयेत् ॥ १३ ॥ अर्वाकपंचाहतो यत्नादस्यनिमंत्रयेत्
कर्तव्योमंडपः प्रोच्चैः कदलीखंडमंडितः ॥ १४ ॥ फलपुष्पदलैर्विष्वक्वितानेन विराजितः ॥ चत २०
दिक्षुध्वजारूपोवहुसंपद्विराजितः ॥ १५ ॥ ऊर्ध्वं सप्तैवलोकाश्च कल्पनीयाः सविस्तरं ॥ तेषुविप्रा

विरक्ताःस्युस्तापनीयाः सर्वेप्यथवा॥१६॥ सर्वेतेयोगमासनानिकर्तव्यानिसहस्रशः॥ वक्तव्यापितथादिव
मासनंपरिकल्पयेत॥१७॥ उदङ्मुखोभवेद्वक्ताश्रोतावैप्राङ्मुखस्तदा॥ प्राङ्मुखोवाभवेद्वक्ताश्रोताचोद
ङ्मुखस्तदा॥१८॥ विरक्तोवैष्णवोविप्रोवेदशास्त्रविशुद्धिकृत्॥ दृष्टांतकुशलोधीरोवक्ताकार्योतिनिस्पृहः॥१९
अनेकधर्मविभ्रांताःस्त्रैणाःपाखंडवादिनः शुकशास्त्रकथोच्चारेत्याज्यास्तेयदिपंडिताः॥२०॥ व
क्तुःपार्श्वेसहायार्थमन्यःस्थाप्यस्तथाविधः पंडितःसंशयच्छेत्तालोकबोधनतत्परः॥२१॥ व
क्त्राक्षौरंप्रकर्तव्यंदिनादर्वाग्व्रताप्तये॥ अरुणोदयेसौनिर्वर्त्यशौचंस्नानंतथाचरेत्॥२२॥ पितॄन्सं
तर्प्यशुद्ध्यर्थंप्रायश्चित्तंसमाचरेत॥ मंडलंचप्रकर्तव्यंतत्रस्थाप्योहरिःस्तथा॥२३॥ कृष्णमुद्दिश्यमं
त्रेणचरेत्पूजाविधिंक्रमात॥ प्रदक्षिणनमस्कारान्पूजांतेस्तुतिमाचरेत॥२४॥ संसारसागरे
मग्नंदीनंमांकरुणानिधे॥ कर्मग्राहगृहीतांगंमामुद्धरभवार्णवात॥२५॥ स्तुतिःप्रसन्नचिते
नकर्तव्याकेवलंतदा॥ श्रीमद्भागवताख्योयंप्रत्यक्षःकृष्णएवहि॥ स्वीकृतोसिमयानाथमु
क्त्यर्थंभवसागरे॥२६॥ मनोरथोमदीयोयंसफलःसर्वथात्वया॥ निर्विघ्नेनैवकर्तव्योदासोहंतवके

पं. भी.
२२

श्राव ॥ ४९ ॥ एवं दीनवचः श्रोत्वा वक्तारं चाप्यहं जयेन संभूषावस्त्रभूषाभिः पूजां तेनं च संस्थापात ॥ ५० ॥ श्रु
त्वा कल्पं बोधकं सर्वशास्त्रविशारद पत्नकथाप्रकाशेन मदस्यानं विनाशय ॥ ५१ ॥ तदश्रेनियमः प
श्चात्कर्तव्यः श्रेयसे मदा सम्यग्राज्येय यावत्किं धारणं येः स एव हि ॥ ५२ ॥ वरणं पंचविधा एणो कथाभंग
निह्ननये ॥ कर्तव्यं तैर्दरित्रो व्याहारस्मात्तरत्रिय वा ॥ ५३ ॥ श्रावणानं वे सुवाश्रान्यो ल्ल वाकीर्ते नकारि
णः ॥ मताम्से पूर्णदन्ताज्ञः सप्तमासनसं विशोत ॥ ५४ ॥ लोकविलय नागरत्नयचिंतो मुद स्य च ॥ कथा
चितः ॥ मद्भ मतिलभते फलं सनसं ॥ ५५ ॥ श्राद्धयो रचमाभ्य सार्द्धं विप्र ह्रोनके ॥ वाचनी याकथा
सम्यक्कृधारकं ह्व धीमतो ॥ ५६ ॥ कथाविधौ वासः कर्तव्यो मध्याह्ने वरिकाद्वये ॥ तत्कथामनुकों
र्यं वै कीतनं वे स वैलरा ॥ ५७ ॥ मलमूत्रमपापं दिल्ल्याहारः सद्भाव हः ॥ हविष्याग्नेन कर्तव्यं
एकवारं कथाविना ॥ ५८ ॥ उपोष्य समनायं वै शक्तिश्रेष्ठण यातना ॥ घृतपानं पयः पानं ह्रस्वा
कृणयान्न रवे ॥ ५९ ॥ फलाहारेण वा साध्यमेकमकेन वा पुनः ॥ सर्वत्सा धर्मवेघ नकर्तव्यं प्रव २२
णं च तत्र ॥ ६० ॥ भोजनं तत्वं यमेककथाश्रवणाकारकं ॥ नोपवासो वाः श्रीकः कथाविघ्नकरो

यदि ॥५१॥ समाहृत्य व्रतिनां पुंसां नियमोच्छ्रणा न भवेत् ॥ विप्रशीलाविहीनानां नाधिकारः कथाश्रुतेः ५२
ब्रह्मचर्यमधः सुप्तिः पत्रावल्यां च भोजनं ॥ कथासमाप्तौ भुक्तिं च कुर्यान्नित्यं कथाव्रती ॥५३॥ द्विदलं मधु
तैलं गरिष्ठान्नं तथैव च ॥ भावदुष्टं पर्युषितं जह्यान्नित्यं कथाव्रती ॥५४॥ पलाण्डुं लशुनं हिंगुं कलिंगं गर
ञ्जनं तथा ॥ नालिकां मूलकं कूष्माण्डं नैवाद्याद्वै कथाव्रती ॥५५॥ कामं क्रोधं मदं मानं मत्सरं लोभमेव च
दम्भं मोहं तथा द्वेषं वर्जयेच्च कथाव्रती ॥५६॥ देवद्वेषं च विप्राणां गुरुगोव्रतिनां तथा ॥ स्त्रीराजमह
तो निन्दां वर्जयेच्च कथाव्रती ॥ सत्यं शौचं दयां मौनमार्जवं विनयं तथा ॥ उदारं मनसं तद्वत्कुर्या
देवं सदा व्रती ॥ रजस्वलान्त्यजम्लेच्छपतितव्रात्यकैस्तथा ॥ द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाव्रती
५७ ॥ दरिद्रश्च क्षयी रोगी निर्भाग्यः पापकर्मकाव ॥ अनपत्यो मोक्षकामः शृणुयात्स कथामिमां ॥५८॥
अपुत्र्या काकवन्ध्या च वन्ध्या या च मृतार्भका ॥ स्रवद्गर्भा च या नारी तया श्राव्यं प्रयत्नतः ॥५९॥ प
तेषु विधिना दत्तेन हत्यघ तस्य भवेत् ॥ मन्तुमृगमारिनाः सप्तकोटिमित फलप्रदा ॥६०॥ एवं कृत्वा व्रतं वि
सिद्ध्यापनमथाचरेत् ॥ तत्र मासाष्टमे व्रतवत्कर्तव्यं फलकं विधि ॥६१॥ अकिंचनेऽप्यमकेऽप्यथा

श्राव ॥ २९ ॥ एवं दीनवचः प्रोच्य वक्तारं चाथ पूजयेत् संभूष्य वस्त्रभूषाभिः पूजांते तं च संस्तुयात् ॥ ३० ॥ शु
मा॰ भा॰ करूप प्रबोधज्ञ सर्वशास्त्रविशारद एतत्कथाप्रकाशेन मदज्ञानं विनाशय ॥ ३१ ॥ तदग्रे नियमः प
२२ श्चात्कर्तव्यः श्रेयसे मुदा सप्तरात्रं यथाशक्ति धारणीयः स एव हि ॥ ३२ ॥ वरणं पंचविप्राणां कथाभंग
निवृत्तये ॥ कर्तव्यं तैर्हरेर्जाप्यं द्वादशाक्षरविद्यया ॥ ३३ ॥ ब्राह्मणान्वैष्णवांश्चान्यांस्तथा कीर्तनकारि
णः ॥ नत्वा संपूज्य दत्ताज्ञः स्वयमासनमाविशेत् ॥ ३४ ॥ लोकवित्तधनागारपुत्रचिंतां व्युदस्य च ॥ कथा
चित्तः ॥ शुद्धमतिर्लभते फलमुत्तमं ॥ ३५ ॥ आसूर्योदयमारभ्य सार्द्धत्रिप्रहरांतकं ॥ वाचनीया कथा
सम्यग्धीरकंठं सुधीमता ॥ ३६ ॥ कथाविरामः कर्तव्यो मध्याह्ने घटिकाद्वयं ॥ तत्कथामनु का
र्यं वै कीर्तनं वैष्णवैस्तदा ॥ ३७ ॥ मलमूत्रजयार्थं हि लघ्वाहारः सुखावहः ॥ हविष्यान्नेन कर्तव्य
एकवारं कथार्थिना ॥ ३८ ॥ उपोष्य सप्तरात्रं वै शक्तिश्चेच्छृणुयात्तदा ॥ घृतपानं पयःपानं कृत्वा वा
शृणुयात्सुखं ॥ ३९ ॥ फलाहारेण वा भाव्यमेकभक्तेन वा पुनः ॥ सुखसाध्यं भवेद्यत्तु कर्तव्यं श्रव
णं च तत् ॥ ४० ॥ भोजनं तु वरं मन्ये कथाश्रवणकारकं ॥ नोपवासो वरः प्रोक्तः कथाविघ्नकरो २२

यति ॥ ४१ ॥ समाहृत्य व्रतिनो यस्तु सोपि नियमोल्लङ्घनं नरः ॥ विसर्जितातिथिहीनानां नाधिकारः कथाश्रवे ४२
श्रमस्य च ये मध्ये समितिः यथावस्थां च भोजनं ॥ कथासमाप्तौ मम किंच क्रमयो विलम्बं कथाश्रुती ॥ ४३ ॥ हिंस्रलं मधु
तैलं गारिशं शुक्तं तथैव च ॥ भावदुष्टं पर्युषितं न स्यान्नित्यं कथाश्रवी ॥ ४४ ॥ पलाण्डुलशुनं हिंगु कलिंगं कर
त्तनं तथा ॥ नालिकां मूलकं कूष्माण्डं वार्ताकं च कथाश्रुती ॥ ४५ ॥ कामं क्रोधं मदं मानं मत्सरं लोभमेव च
दंभं मोहं तथा द्वेषं वर्जयेच्च कथाश्रुती ॥ ४६ ॥ देवदैवज्ञविप्राणां गुरूणां गोव्रतिनां तथा ॥ स्त्रीराजमह
तां निंदां वर्जयेच्च कथाश्रुती ॥ सत्यं शौचं दयां मौनमार्जवं विनयं तथा ॥ उदारं मनमिस्थं तद्दकुर्या
देवं सदा श्रुती ॥ रजस्वलां त्यजन्त्यजम्लेच्छपतितव्रात्यकैस्तथा ॥ द्विजद्विड्वेदबाह्यैश्च न वदेद्यः कथाश्रुती
४७ ॥ हरिहरस्तथा रोगी निर्भाग्यः पापकर्मकारकः ॥ अनपत्यो मोक्षकामः शृणुयात्तु कथामिमां ॥ ४८ ॥
अपुष्पा काकवंध्या च वंध्या या च मृतार्भका ॥ स्रवद्गर्भा च या नारी तया श्राव्यं प्रयत्नतः ॥ ४९ ॥ ए
तेषु विधिना देव सत्यं चाक्षयं भवेत् ॥ अत्युत्तमा इयं दिव्या कोटियज्ञफलप्रदा ॥ ५० ॥ एवं कृत्वा व्रतवि
धिं यथापनं यथा च वेत् ॥ न ज्ञात्मा ... शृणोति व्रतकं तं वै फलं कोटिशिभिः ॥ ५१ ॥ अकिंचनेष्वभक्तेषु या ये

नोद्यापनाग्रहः॥ सुवर्णेनैव सर्वास्ते निष्कामावै सदाघतः॥५२॥ एवं समस्तरूपस्तेस्मिन्नमामेशोत्तर॥
भिस्तरा॥ शुक्लकस्य च ष्टकुंभस्थ रत्नाकायो निभक्तितः॥५३॥ सस्मादस्तलसीमालाश्चोतभव्यस्वर्गदीपतो
मरोगताललसितकीर्तनैकीर्तितो ततः॥५४॥ नयश्चाद्योनमः शाह्नः शंसत्वशान्तस्य गीयतो॥ विरक्तश्च
दवेक्ते तागीताबाद्यापरेहनि॥५५॥ गृहस्थस्य नैत्यदा होमः कुर्मशांतयेप्रतिश्चो कंचनकूपादिदि फ नै प:
क्षमरक्षमसस्य च॥५६॥ पायसेमधुसर्पिर्भ्यां तैलाज्ञादिकसंयुते॥ अथवाहवनेकुर्यात्सायमास्त समा
हितः॥५७॥ तन्मयत्वान्तु रामस्य परमस्य समन्वतः॥ होमाशक्तौ तु धीहोमंदद्यान्मकलसिद्ध
ये॥५८॥ नानाछिद्रनिरोधार्थं न्यूनतानाधिकलाद्ययोः॥ दोषयोः प्रशमार्थं च प्रदेशस्मस्तहह्नके॥५९॥
तेनस्यात्तत्फलं सर्वे नात्र स्यादधिकं यतः॥ द्वादशाब्दाग्रहणान्त्सशाद्धेनयेन्मधुपायसैः॥६०॥ दद्यात्स
वर्णधेनुं च ब्रनसूर्णत्वसिद्धये॥ शक्तोपलयत्त सितं स्वर्ण हिसेवि धायच॥६१॥ तत्रास्य पुस्तकं स्थाप्य
ले पलिखिस्तोलिनात्तरं॥ संस्वस्य वाहनाद्यैश्च उपचारैः सदक्षिणं॥६२॥ वस्त्रभूषणगंधाद्यैः प्रजितायं भे
यताम्मने॥ आचार्याय समर्पीदं नामनकः स्याद्व वंधनेः॥६३॥ एवं कृते विधाने च सर्वपापनिवार

णां ॥ फलंस्यात्पुराणानांतुश्रीमद्भागवतंशुभे ॥ ७४ ॥ धर्मार्थकाममोक्षाणांसाधनंनात्रसंशयः ॥ इति
तेकथितंसर्वंकिंभूयःश्रोतुमिच्छसि ॥ ७५ ॥ श्रीमद्भागवतेनैवभुक्तिर्मुक्तिःप्रकाशिता ॥ श्रीसूत
उवाच ॥ एतस्मिन्नंतरेमहात्मानःप्रोचुर्भागवतींकथां ॥ सर्वपापहरांपुण्यांभुक्तिमुक्तिप्रदायिनीं ॥ ७६ ॥ शृण्वतांस
र्वभूतानांसप्ताहंनियतात्मनां ॥ यथाविधिततोदेवंतुष्टुवुःपुरुषोत्तमं ॥ ७७ ॥ तदंतेज्ञानवैराग्यभक्तीनांपुष्ट
तापरा ॥ तारुण्यंपरमंचाभूत्सर्वलोकमनोहरं ॥ ७८ ॥ नारदश्चकृतार्थोभूत्सिद्धेस्वीयेमनोरथे ॥ पुलकीकृ
तसर्वांगःपरमानंदसंभृतः ॥ ७९ ॥ एवंकथांसमाकर्ण्यनारदोभगवत्प्रियः ॥ प्रेमगद्गदयावाचातान्
उवाचकृतांजलिः ॥ ८० ॥ नारद उवाच ॥ धन्योस्म्यनुगृहीतोस्मिभवद्भिःकरुणापरैः ॥ अद्यमेभगवाल्ल
ब्धःसर्वपापहरोहरिः ॥ ८१ ॥ श्रवणंसर्वधर्मेभ्योवरंमन्येतपोधनाः ॥ वैकुंठस्थोयतःकृष्णःश्रवणा
द्यस्यलभ्यते ॥ ८२ ॥ सूत उवाच ॥ एवंब्रुवतिवैतत्रनारदेवैष्णवोत्तमे ॥ परिभ्रमन्समायातःशुकोयोगे
श्वरस्तदा ॥ ८३ ॥ तत्राययौषोडशवार्षिकःसव्यासपुत्रोज्ञानमहाब्धिचंद्रमाः ॥ कथावसानेनिजला
भपूर्णःप्रेम्णापठन्भागवतंशनैःशनैः ॥ ८४ ॥ दृष्ट्वासदस्याःपरमोरुतेजसंसद्यःसमुत्थायददुर्महासनं

श्रीत्वा सर्वाखिलमहत्जगत्स्वं स्थितो वदन्मे स्तरणातामलं गिरं ॥९५॥ श्रीशुक उवाच ॥ निगमकल्पतरोर्ग-
लितं फलं शुकमुखादमृतद्रवसंयुतं ॥ पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥९६॥ ध-
र्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं ॥ श्रीमद्भा-
गवते महामुनिकृते किं वा परैरीश्वरः सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात ॥९७॥ श्री-
मद्भागवतं पुराणतिलकं यद्वैष्णवानां प्रियं यस्मिन्पारमहंस्यमेवममलं ज्ञानं परं गीयते ॥ यत्र ज्ञान-
विरक्तिभक्तिसहितं नैष्कर्म्यमाविष्कृतं ॥ तच्छृण्वन्प्रपठन्विचारणपरो भक्त्या विमुच्येन्नरः ॥९८॥ स्व-
र्गे सत्ये च कैलासे वैकुण्ठे नास्त्ययं रसः ॥ अतः पिबन्तु सद्भाग्या मा मा मुञ्चत कर्हिचित ॥ सूत उवाच
इति ब्रुवाणे संसति वादरायणे मध्ये सभायां हरिराविरासीत ॥ प्रह्लादबल्युद्धवफाल्गुनादिभिर्वृतः
सुरर्षिस्तमपूजयच्च तान ॥१००॥ दृष्ट्वा प्रसन्नं महदासने हरिं ते चक्रिरे कीर्तनमग्रतस्तदा ॥ भवो भवा-
न्या कमलासनस्तु तत्रागमत्कीर्तनदर्शनाय ॥१०१॥ प्रह्लादस्तालधारी तरलगतितया चोद्धवः कां-
स्यधारी वीणाधारी सुरर्षिः स्वरकुशलतया रागकर्तार्जुनोभूत ॥ इन्द्रोवादीन्मृदंगं जयजयसुकराः २४

कीर्तनेनैतेऽसमाराधयतोऽग्रे भावैर्वक्तारं स चिरं सनत्पाद्मासश्च योऽवभूव ॥८२॥ ननन्न मध्येपिक मेवनतश्च भा
कुमारिकानां नन्दपत्न्यस्तेन सा ॥ बालैकि कौतेन मेनल्ही सहृनिः प्रसाद्गोपिवचोव्रवीमनः ॥८३॥ ममाव
र भावं वृन्दावनं सृमाहृणाधवे धीमतः ॥ कथाकीर्तनेन नोस्मिसो भवे ॥ सुन्नेमित्तह्य कामनिग्रमत्राः येमार्ईचिना
ममा हरिमूर्विरेनेन ॥८४॥ नागाहृगायाम चसर्वेभकैरेभिन्नं घा भाग्यमनिग्रवल्लाना ॥ मनोरथो यं परिह
राणीयस्त्वयेति चोक्तोऽन्तरधीयताच्युतः ॥८५॥ ननोनमन्न ह्वराणोशुन्मृदत्त यासुकारी नपिनाय सो
ग्र ॥ ग्रयग्रहृहृताः पतिः नष्टमोहाः ॥ सर्वेयघुः प्रीतक धामन्नाले ॥८६॥ भक्तिः सुताभ्यां सह हृदि स्थि
तासो घाहेस्वकीये पिनद्धा शुकेन ॥ अतो हरिर्भागवतस्य सेवनाच्चित्ते समायाति हि वैष्णवानां ॥८७॥
दारिद्रदुःखज्वरदाहितानां मायापिशाचीपरिमर्दितानां ॥ संसारसिंधौ परिपातितानां क्षेमाय वै
भागवतं प्रगर्जति ॥८८॥ शौनक उवाच ॥ शुकेनोक्तं कदा राज्ञे गोकर्णेन कदा पुनः ॥ सुरर्षये करा
ब्राह्मैः छिंधि मे संशयं त्विमं ॥८९॥ सूत उवाच ॥ आकृष्णनिर्गमात्त्रिंशद्वर्षाधिगते कलौ नवमीतो
नभस्ये च कथारंभं शुकोऽकरोत् ॥९०॥ परीक्षिच्छ्रवणांते च कलौ वर्षशतद्वये ॥ शुद्धे शुचौ नवम्यां च धे
नुजोऽकथयत्कथां ॥९१॥ तस्मादपि कलौ प्राप्ते त्रिंशद्वर्षगते ॥ ऊचुरूर्जे सिते पक्षे नवम्यां ब्रह्मस

णः सुता ॥ ७२ ॥ इति ते सर्वमाख्यातं यत्पृष्टोऽहं त्वयानघ ॥ कलौ भागवती वार्ता भवरोगविनाशिनी ॥ ७३ ॥
शृण्वंति ये सकलकल्मषनाशनं च ॥ मुक्त्यैकहेतुमिह भक्तिविलासकारि ॥ संतः कथानकमिदं पिबतादरेण लोके हि तीर्थपरिशीलनसेवया किं ॥ ७४ ॥ स्वपुरुषमपि वीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले परिहर भगवत्कथासु मत्तान् प्रभुरहमन्यनृणां न वैष्णवानां ॥ ७५ ॥ असारे संसारे विषयविषसंगाकुलधियः क्षणार्द्धं क्षेमार्थं पिबत शुकगाथातुलसुधां ॥ किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने ॥ ७६ ॥ रसप्रवाहसंस्थेन श्रीशुकेनेरिता कथा ॥ कंठे संबध्यते येन स वैकुंठप्रभुर्भवेत ॥ ७७ ॥ इति च परमगुह्यं सर्वसिद्धांतसिद्धं सपदि निगदितं ते शास्त्रपुंजं विलोक्य ॥ जगति शुककथातो निर्मलं नास्ति किंचित् पिब परसुखहेतोर्द्वादशस्कंधसारं ॥ ७८ ॥ एतां यो नियततमनाः शृणोति भक्त्या यश्चैनां कथयति शुद्धवैष्णवाग्रे । तौ सम्यग्विधिकरणात्फलं लभेते याथार्थ्यान्न हि भुवने किमप्यसाध्यं ॥ ७९ ॥ इति श्रीपद्मपुराणे उत्तरखंडे भागवतमाहात्म्ये श्रवणविधिकथनं नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १५
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥